# ॥ શ્રીપરશુરામસહસ્રનામસ્તોત્રમ્ ॥

.. Shri Parashurama Sahasranamastotra ..

sanskritdocuments.org

August 2, 2016

# .. Shri Parashurama Sahasranamastotra ..

# ॥ શ્રીપરશુરામસહસ્રનામસ્તોત્રમ્ ॥

## Document Information

Text title : parashurAmasahasranAmastotra

File name : parashurAmasahasranAmastotra.itx

Category : sahasranAma

Location : doc_vishhnu

Language : Sanskrit

Subject : hinduism

Proofread by : DPD, NA

Source : bhagavAn parashurAma by vIrAchArya shAstrI, reNukAnantran

Latest update : March 8, 2013, May 27, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ શ્રીપરશુરામસહસ્રનામસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ।

પુરા દાશરથી રામઃ કૃતોદ્વાહઃ સબાન્ધવઃ ।
ગચ્છન્નયોધ્યાં રાજેન્દ્રઃ પિતૃમાતૃસુહૃદ્ વૃતઃ ॥ ૧॥

દદર્શ યાન્તં માર્ગેણ ક્ષત્રિયાન્તકરં વિભુમ્ ।
રામં તં ભાર્ગવં દૃષ્ટ્વાભિતસ્તુષ્ટાવ રાઘવઃ ।
રામઃ શ્રીમાન્મહાવિષ્ણુરિતિ નામ સહસ્રતઃ ॥ ૨॥

અહં ત્વત્તઃ પરં રામ વિચરામિ સ્વલીલયા ।
ઇત્યુક્તવન્તમભ્યર્ચ્ય પ્રણિપત્ય કૃતાઞ્જલિઃ ॥ ૩ ॥

શ્રીરાઘવ ઉવાચ -

યન્નામગ્રહણાજ્જન્તુઃ પ્રાપ્નુયાત્ર ભવાપદમ્ ।
યસ્ય પાદાર્ચનાત્સિદ્ધિઃ સ્વેપ્સિતાં નૌમિ ભાર્ગવમ્ ॥ ૪॥

નિઃસ્પૃહો યઃ સદા દેવો ભૂમ્યાં વસતિ માધવઃ ।
આત્મબોધોદધિં સ્વચ્છં યોગિનં નૌમિ ભાર્ગવમ્ ॥ ૫॥

યસ્માદેતજ્જગત્સર્વં જાયતે યત્ર લીલયા ।
સ્થિતિં પ્રાપ્નોતિ દેવેશં જામદગ્ન્યં નમામ્યહમ્ ॥ ૬॥

યસ્ય ભ્રૂ ભઙ્ગમાત્રેણ બ્રહ્માદ્યાઃ સકલાઃ સુરાઃ ।
શતવારં ભવન્ત્યત્ર ભવન્તિ ન ભવન્તિ ચ ॥ ૭॥

તપ ઉગ્રં ચચારાદૌ યમુદ્દિશ્ય ચ રેણુકા ।
આદ્યા શક્તિર્મહાદેવી રામં તં પ્રણમામ્યહમ્ ॥ ૮॥

॥ અથ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીજામદગ્ન્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય શ્રીરામ ઋષિઃ ।
જામદગ્ન્યઃ પરમાત્મા દેવતા ।
અનુષ્ટુપ્ છન્દઃ । શ્રીમદવિનાશરામપ્રીત્યર્થં
ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

॥ અથ કરન્યાસઃ ॥

ૐ હ્રાં ગોવિન્દાત્મને અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં મહીધરાત્મને તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં હૃષીકેશાત્મને મધ્યમાભ્યાં નમઃ ।

ॐ હ્રૈં ત્રિવિક્રમાત્મને અનામિકાભ્યાં નમઃ ।
ॐ હ્રૌં વિષ્ણવાત્મને કનિષ્ઠિકાભ્યાં નમઃ ।
ॐ હ્રઃ માધવાત્મને કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ અથ હૃદયન્યાસઃ ॥

ॐ હ્રાં ગોવિન્દાત્મને હૃદયાય નમઃ ।
ॐ હ્રીં મહીધરાત્મને શિરસે સ્વાહા ।
ॐ હ્રૂં હૃષીકેશાત્મને શિખાયૈ વષટ્ ।
ॐ હ્રૈં ત્રિવિક્રમાત્મને કવચાય હુમ્ ।
ॐ હ્રૌં વિષ્ણવાત્મને નેત્રત્રયાય વૌષટ્ ।
ॐ હ્રઃ માધવાત્મને અસ્ત્રાય ફટ્ ।

॥ અથ ધ્યાનમ્ ॥

શુદ્ધજામ્બૂનદનિભં બ્રહ્મવિષ્ણુશિવાત્મકમ્ ।
સર્વાભરણસંયુક્તં કૃષ્ણાજિનધરં વિભુમ્ ॥ ૯॥

બાણચાપૌ ચ પરશુમભયં ચ ચતુર્ભુજૈઃ ।
પ્રકોષ્ઠશોભિ રુદ્રાક્ષૈર્દધાનં ભૃગુનન્દનમ્ ॥ ૧૦॥

હેમયજ્ઞોપવીતં ચ સ્નિગ્ધસ્મિતમુખામ્બુજમ્ ।
દર્ભાઞ્ચિતકરં દેવં ક્ષત્રિયક્ષયદીક્ષિતમ્ ॥ ૧૧॥

શ્રીવત્સવક્ષસં રામં ધ્યાયેદ્વૈ બ્રહ્મચારિણમ્ ।
હૃત્પુણ્ડરીકમધ્યસ્થં સનકાદ્યૈરભિષ્ટુતમ્ ॥ ૧૨॥

સહસ્રમિવ સૂર્યાણામેકી ભૂય પુરઃ સ્થિતમ્ ।
તપસામિવ સન્મૂર્તિં ભૃગુવંશતપસ્વિનમ્ ॥ ૧૩ ॥

ચૂડાચુમ્બિતકઙ્કપત્રમભિતસ્તૂણીદ્વયં પૃષ્ઠતો
ભસ્મસ્નિગ્ધપવિત્રલાઞ્છનવપુર્ધત્તે ત્વચં રૌરવીમ્ ।
મૌઞ્જ્યા મેખલયા નિયન્ત્રિતમધોવાસશ્ચ માઞ્જિષ્ઠકમ્
પાણૌ કાર્મુકમક્ષસૂત્રવલયં દણ્ડં પરં પૈપ્પલમ્ ॥ ૧૪॥

રેણુકાહૃદયાનન્દં ભૃગુવંશતપસ્વિનમ્ ।
ક્ષત્રિયાણામન્તકં પૂર્ણં જામદગ્ન્યં નમામ્યહમ્ ॥ ૧૫॥

અવ્યક્તવ્યક્તરૂપાય નિર્ગુણાય ગુણાત્મને ।
સમસ્તજગદાધારમૂર્તયે બ્રહ્મણે નમઃ ॥ ૧૬॥

॥ શ્રીપરશુરામ દ્વાદશ નામાનિ ॥

હરિઃ પરશુધારી ચ રામશ્ચ ભૃગુનન્દનઃ ।
એકવીરાત્મજોવિષ્ણુર્જામદગ્ન્યઃ પ્રતાપવાન્ ॥ ૧૭॥

સહ્યાદ્રિવાસી વીરશ્ચ ક્ષત્રજિત્પૃથિવીપતિઃ ।
ઇતિ દ્વાદશનામાનિ ભાર્ગવસ્ય મહાત્મનઃ ।
યસ્ત્રિકાલે પઠેન્નિત્યં સર્વત્ર વિજયી ભવેત્ ॥ ૧૮॥

---

॥ અથ શ્રીપરશુરામસહસ્રનામસ્તોત્રમ્ ॥

ૐ રામઃ શ્રીમાન્મહાવિષ્ણુર્ભાર્ગવો જમદગ્નિજઃ ।
તત્ત્વરૂપી પરં બ્રહ્મ શાશ્વતઃ સર્વશક્તિધૃક્ ॥ ૧॥

વરેણ્યો વરદઃ સર્વસિદ્ધિદઃ કઞ્જલોચનઃ ।
રાજેન્દ્રશ્ચ સદાચારો જામદગ્ન્યઃ પરાત્પરઃ ॥ ૨॥

પરમાર્થૈકનિરતો જિતામિત્રો જનાર્દનઃ ।
ઋષિ પ્રવરવન્ધશ્ચ દાન્તઃ શત્રુવિનાશનઃ ॥ ૩ ॥

સર્વકર્મા પવિત્રશ્ચ અદીનો દીનસાધકઃ ।
અભિવાદ્યો મહાવીરસ્તપસ્વી નિયમઃ પ્રિયઃ ॥ ૪॥

સ્વયમ્ભૂઃ સર્વરૂપશ્ચ સર્વાત્મા સર્વદૃક્પ્રભુઃ ।
ઈશાનઃ સર્વદેવાદિર્વરીયન્સર્વગોઽચ્યુતઃ ॥ ૫॥

સર્વજ્ઞઃ સર્વવેદાદિઃ શરણ્યઃ પરમેશ્વરઃ ।
જ્ઞાનભાવ્યોઽપરિચ્છેદ્યઃ શુચિર્વાગ્મી પ્રતાપવાન્ ॥ ૬॥

જિતક્રોધો ગુડાકેશો દ્યુતિમાનરિમર્દનઃ ।
રેણુકાતનયઃ સાક્ષાદજિતોઽવ્યય એવ ચ ॥ ૭॥

વિપુલાંસો મહોરસ્કોઽતીન્દ્રો વન્દ્યો દયાનિધિઃ ।
અનાદિર્ભગવાનિન્દ્રઃ સર્વલોકારિમર્દનઃ ॥ ૮॥

સત્યઃ સત્યવ્રતઃ સત્યસન્ધઃ પરમધાર્મિકઃ ।
લોકાત્મા લોકકૃલ્લોકવન્દ્યઃ સર્વમયો નિધિઃ ॥ ૯॥

વશ્યો દયા સુધીર્ગોપ્તા દક્ષઃ સર્વૈકપાવનઃ ।
બ્રહ્મણ્યો બ્રહ્મચારી ચ બ્રહ્મ બ્રહ્મપ્રકાશકઃ ॥ ૧૦॥

સુન્દરોઽજિનવાસાશ્ચ બ્રહ્મસૂત્રધરઃ સમઃ ।
સૌમ્યો મહર્ષિઃ શાન્તશ્ચ મૌઞ્જીભૃદ્દણ્ડધારકઃ ॥ ૧૧॥

કોદણ્ડી સર્વજિત્છત્રદર્પહા પુણ્યવર્ધનઃ । var સર્વજિચ્છત્રુદર્પહા
કવિર્બ્રહ્મર્ષિ વરદઃ કમણ્ડલુધરઃ કૃતી ॥ ૧૨॥

મહોદારોઽતુલો ભાવ્યો જિતષડ્વર્ગમણ્ડલઃ ।
કાન્તઃ પુણ્યઃ સુકીર્તિશ્ચ દ્વિભુજશ્ચાદિ પૂરુષઃ ॥ ૧૩ ॥

અકલ્મષો દુરારાધ્યઃ સર્વાવાસઃ કૃતાગમઃ ।
વીર્યવાન્સ્મિતભાષી ચ નિવૃત્તાત્મા પુનર્વસુઃ ॥ ૧૪॥

અધ્યાત્મયોગકુશલઃ સર્વાયુધવિશારદઃ ।
યજ્ઞસ્વરૂપી યજ્ઞેશો યજ્ઞપાલઃ સનાતનઃ ॥ ૧૫॥

ઘનશ્યામઃ સ્મૃતિઃ શૂરો જરામરણવર્જિતઃ ।
ધીરો દાન્તઃ સુરૂપશ્ચ સર્વતીર્થમયો વિધિઃ ॥ ૧૬॥ ધીરોદાત્તઃ સ્વરૂપશ્ચ
વર્ણી વર્ણાશ્રમગુરુઃ સર્વજિત્પુરુષોઽવ્યયઃ ।
શિવશિક્ષાપરો યુક્તઃ પરમાત્મા પરાયણઃ ॥ ૧૭॥

પ્રમાણ રૂપો દુર્જ્ઞેયઃ પૂર્ણઃ ક્રૂરઃ ક્રતુર્વિભુઃ ।
આનન્દોઽથ ગુણશ્રેષ્ઠોઽનન્તદૃષ્ટિર્ગુણાકરઃ ॥ ૧૮॥

ધનુર્ધરો ધનુર્વેદઃ સચ્ચિદાનન્દવિગ્રહઃ ।
જનેશ્વરો વિનીતાત્મા મહાકાયસ્તપસ્વિરાટ્ ॥ ૧૯॥

અખિલાદ્યો વિશ્વકર્મા વિનીતાત્મા વિશારદઃ ।
અક્ષરઃ કેશવઃ સાક્ષી મરીચિઃ સર્વકામદઃ ॥ ૨૦॥

કલ્યાણઃ પ્રકૃતિ કલ્પઃ સર્વેશઃ પુરુષોત્તમઃ ।
લોકાધ્યક્ષો ગભીરોઽથ સર્વભક્તવરપ્રદઃ ॥ ૨૧॥

જ્યોતિરાનન્દરૂપશ્ચ વહ્નીરક્ષય આશ્રમી ।
ભૂર્ભુવઃસ્વસ્તપોમૂર્તી રવિઃ પરશુધૃક્ સ્વરાટ્ ॥ ૨૨॥

બહુશ્રુતઃ સત્યવાદી ભ્રાજિષ્ણુઃ સહનો બલઃ ।
સુખદઃ કારણં ભોક્તા ભવબન્ધ વિમોક્ષકૃત્ ॥ ૨૩॥

સંસારતારકો નેતા સર્વદુઃખવિમોક્ષકૃત્ ।
દેવચૂડામણિઃ કુન્દઃ સુતપા બ્રહ્મવર્ધનઃ ॥ ૨૪॥

નિત્યો નિયતકલ્યાણઃ શુદ્ધાત્માથ પુરાતનઃ ।
દુઃસ્વપ્નનાશનો નીતિઃ કિરીટી સ્કન્દદર્પહૃત્ ॥ ૨૫॥

અર્જુનઃ પ્રાણહા વીરઃ સહસ્રભુજજિદ્ધરીઃ ।
ક્ષત્રિયાન્તકરઃ શૂરઃ ક્ષિતિભારકરાન્તકૃત્ ॥ ૨૬॥

પરશ્વધધરો ધન્વી રેણુકાવાક્યતત્પરઃ ।
વીરહા વિષમો વીરઃ પિતૃવાક્યપરાયણઃ ॥ ૨૭॥

માતૃપ્રાણદ ઈશશ્ચ ધર્મતત્ત્વવિશારદઃ ।
પિતૃક્રોધહરઃ ક્રોધઃ સપ્તજિહ્વસમપ્રભઃ ॥ ૨૮॥

સ્વભાવભદ્રઃ શત્રુઘ્નઃ સ્થાણુઃ શમ્ભુશ્ચ કેશવઃ ।
સ્થવિષ્ઠઃ સ્થવિરો બાલઃ સૂક્ષ્મો લક્ષ્યદ્યુતિર્મહાન્ ॥ ૨૯॥

બ્રહ્મચારી વિનીતાત્મા રુદ્રાક્ષવલયઃ સુધીઃ ।
અક્ષકર્ણઃ સહસ્રાંશુર્દીપ્તઃ કૈવલ્યતત્પરઃ ॥ ૩૦॥

આદિત્યઃ કાલરુદ્રશ્ચ કાલચક્રપ્રવર્તકઃ ।
કવચી કુણ્ડલી ખડ્ગી ચક્રી ભીમપરાક્રમઃ ॥ ૩૧॥

મૃત્યુઞ્જયો વીર સિંહો જગદાત્મા જગદ્ગુરુઃ ।
અમૃત્યુર્જન્મરહિતઃ કાલજ્ઞાની મહાપટુઃ ॥ ૩૨॥

નિષ્કલઙ્કો ગુણગ્રામોઽનિર્વિણ્ણઃ સ્મરરૂપધૃક્ ।
અનિર્વેદ્યઃ શતાવર્તો દણ્ડો દમયિતા દમઃ ॥ ૩૩॥

પ્રધાનસ્તારકો ધીમાંસ્તપસ્વી ભૂતસારથિઃ ।
અહઃ સંવત્સરો યોગી સંવત્સરકરો દ્વિજઃ ॥ ૩૪॥

શાશ્વતો લોકનાથશ્ચ શાખી દણ્ડી બલી જટી ।
કાલયોગી મહાનન્દઃ તિગ્મમન્યુઃ સુવર્ચસઃ ॥ ૩૫॥

અમર્ષણો મર્ષણાત્મા પ્રશાન્તાત્મા હુતાશનઃ ।
સર્વવાસાઃ સર્વચારી સર્વાધારો વિરોચનઃ ॥ ૩૬॥

હૈમો હેમકરો ધર્મો દુર્વાસા વાસવો યમઃ ।
ઉગ્રતેજા મહાતેજા જયો વિજયઃ કાલજિત્ ॥ ૩૭॥

સહસ્રહસ્તો વિજયો દુર્ધરો યજ્ઞભાગભુક્ ।
અગ્નિર્જ્વાલી મહાજ્વાલસ્ત્વતિધૂમો હુતો હવિઃ ॥ ૩૮॥

સ્વસ્તિદઃ સ્વસ્તિભાગશ્ચ મહાન્ભર્ગઃ પરો યુવા । મહાન્ભર્ગપરોયુવા
મહત્પાદો મહાહસ્તો બૃહત્કાયો મહાયશાઃ ॥ ૩૯॥

મહાકટિર્મહાગ્રીવો મહાબાહુર્મહાકરઃ ।
મહાનાસો મહાકમ્બુર્મહામાયઃ પયોનિધિઃ ॥ ૪૦॥

મહાવક્ષા મહૌજાશ્ચ મહાકેશો મહાજનઃ ।
મહામૂર્ધા મહામાત્રો મહાકર્ણો મહાહનુઃ ॥ ૪૧॥

વૃક્ષાકારો મહાકેતુર્મહાદંષ્ટ્રો મહામુખઃ ।
એકવીરો મહાવીરો વસુદઃ કાલપૂજિતઃ ॥ ૪૨॥

મહામેઘનિનાદી ચ મહાઘોષો મહાદ્યુતિઃ ।
શૈવઃ શૈવાગમાચારી હૈહયાનાં કુલાન્તકઃ ॥ ૪૩ ॥

સર્વગુહ્યમયો વજ્રી બહુલઃ કર્મસાધનઃ ।
કામી કપિઃ કામપાલઃ કામદેવઃ કૃતાગમઃ ॥ ૪૪॥

પઞ્ચવિંશતિતત્ત્વજ્ઞઃ સર્વજ્ઞઃ સર્વગોચરઃ ।
લોકનેતા મહાનાદઃ કાલયોગી મહાબલઃ ॥ ૪૫॥

અસઙ્ખ્યેયોઽપ્રમેયાત્મા વીર્યકૃદ્વીર્યકોવિદઃ ।
વેદવેદ્યો વિયદ્ગોપ્તા સર્વામરમુનીશ્વરઃ ॥ ૪૬॥

સુરેશઃ શરણં શર્મ શબ્દબ્રહ્મ સતાં ગતિઃ ।
નિર્લેપો નિષ્પ્રપઞ્ચાત્મા નિર્વ્યગ્રો વ્યગ્રનાશનઃ ॥ ૪૭॥

શુદ્ધઃ પૂતઃ શિવારમ્ભઃ સહસ્રભુજજિદ્ધરિઃ ।
નિરવદ્યપદોપાયઃ સિદ્ધિદઃ સિદ્ધિસાધનઃ ॥ ૪૮॥

ચતુર્ભુજો મહાદેવો વ્યૂઢોરસ્કો જનેશ્વરઃ ।
દ્યુમણિસ્તરણિર્ધન્યઃ કાર્તવીર્ય બલાપહા ॥ ૪૯॥

લક્ષ્મણાગ્રજવન્દ્યશ્ચ નરો નારાયણઃ પ્રિયઃ ।
એકજ્યોતિર્નિરાતઙ્કો મત્સ્યરૂપી જનપ્રિયઃ ॥ ૫૦॥

સુપ્રીતઃ સુમુખઃ સૂક્ષ્મઃ કૂર્મો વારાહકસ્તથા ।
વ્યાપકો નારસિંહશ્ચ બલિજિન્મધુસૂદનઃ ॥ ૫૧॥

અપરાજિતઃ સર્વસહો ભૂષણો ભૂતવાહનઃ ।
નિવૃત્તઃ સંવૃત્તઃ શિલ્પી ક્ષુદ્રહા નિત્ય સુન્દરઃ ॥ ૫૨॥

સ્તવ્યઃ સ્તવપ્રિયઃ સ્તોતા વ્યાસમૂર્તિરનાકુલઃ ।
પ્રશાન્તબુદ્ધિરક્ષુદ્રઃ સર્વસત્ત્વાવલમ્બનઃ ॥ ૫૩ ॥

પરમાર્થગુરુર્દેવો માલી સંસારસારથિઃ ।
રસો રસજ્ઞઃ સારજ્ઞઃ કઙ્કણીકૃતવાસુકિઃ ॥ ૫૪॥

કૃષ્ણઃ કૃષ્ણસ્તુતો ધીરો માયાતીતો વિમત્સરઃ ।
મહેશ્વરો મહીભર્તા શાકલ્યઃ શર્વરીપતિઃ ॥ ૫૫॥

તટસ્થઃ કર્ણદીક્ષાદઃ સુરાધ્યક્ષઃ સુરારિહા ।
ધ્યેયોઽગ્રધુર્યો ધાત્રીશો રુચિસ્ત્રિભુવનેશ્વરઃ ॥ ૫૬॥

કર્માધ્યક્ષો નિરાલમ્બઃ સર્વકામ્યઃ ફલપ્રદઃ ।
અવ્યક્તલક્ષણો વ્યક્તો વ્યક્તાવ્યક્તો વિશામ્પતિઃ ॥ ૫૭॥

ત્રિલોકાત્મા ત્રિલોકેશો જગન્નાથો જનેશ્વરઃ ।
બ્રહ્મા હંસશ્ચ રુદ્રશ્ચ સ્રષ્ટા હર્તા ચતુર્મુખઃ ॥ ૫૮॥

નિર્મદો નિરહઙ્કારો ભૃગુવંશોદ્વહઃ શુભઃ ।
વેધા વિધાતા દ્રુહિણો દેવજ્ઞો દેવચિન્તનઃ ॥ ૫૯॥

કૈલાસશિખરાવાસી બ્રાહ્મણો બ્રાહ્મણપ્રિયઃ ।
અર્થોઽનર્થો મહાકોશો જ્યેષ્ઠઃ શ્રેષ્ઠઃ શુભાકૃતિઃ ॥ ૬૦॥

બાણારિર્દમનો યજ્વા સ્નિગ્ધપ્રકૃતિરગ્નિયઃ ।
વરશીલો વરગુણઃ સત્યકીર્તિઃ કૃપાકરઃ ॥ ૬૧॥

સત્ત્વવાન્ સાત્ત્વિકો ધર્મી બુદ્ધઃ કલ્કી સદાશ્રયઃ ।
દર્પણો દર્પહા દર્પાતીતો દૃપ્તઃ પ્રવર્તકઃ ॥ ૬૨॥

અમૃતાંશોઽમૃતવપુર્વાઙ્મયઃ  સદસન્મયઃ ।
નિધાનગર્ભો ભૂશાયી કપિલો વિશ્વભોજનઃ ॥ ૬૩ ॥

પ્રભવિષ્ણુર્ગ્રસિષ્ણુશ્ચ ચતુર્વર્ગફલપ્રદઃ ।
નારસિંહો મહાભીમઃ શરભઃ કલિપાવનઃ ॥ ૬૪॥

ઉગ્રઃ પશુપતિર્ભર્ગો વૈદ્યઃ કેશિનિષૂદનઃ ।
ગોવિન્દો ગોપતિર્ગોપ્તા ગોપાલો ગોપવલ્લભઃ ॥ ૬૫॥

ભૂતાવાસો ગુહાવાસઃ સત્યવાસઃ શ્રુતાગમઃ ।
નિષ્કણ્ટકઃ સહસ્રાર્ચિઃ સ્નિગ્ધઃ પ્રકૃતિદક્ષિણઃ ॥ ૬૬॥ લક્ષણઃ
અકમ્પિતો ગુણગ્રાહી સુપ્રીતઃ પ્રીતિવર્ધનઃ ।
પદ્મગર્ભો મહાગર્ભો વજ્રગર્ભો જલોદ્ભવઃ ॥ ૬૭॥

ગભસ્તિર્બ્રહ્મકૃદ્બ્રહ્મ રાજરાજઃ સ્વયમ્ભવઃ । સ્વયમ્ભુવઃ
સેનાનીરગ્રણી સાધુર્બલસ્તાલીકરો મહાન્ ॥ ૬૮॥

પૃથિવી વાયુરાપશ્ચ તેજઃ ખં બહુલોચનઃ ।
સહસ્રમૂર્ધા દેવેન્દ્રઃ સર્વગુહ્યમયો ગુરુઃ ॥ ૬૯॥

અવિનાશી સુખારામસ્ત્રિલોકી પ્રાણધારકઃ ।
નિદ્રારૂપં ક્ષમા તન્દ્રા ધૃતિર્મેધા સ્વધા હવિઃ ॥ ૭૦॥

હોતા નેતા શિવસ્ત્રાતા સપ્તજિહ્વો વિશુદ્ધપાત્ ।
સ્વાહા હવ્યશ્ચ કવ્યશ્ચ શતઘ્ની શતપાશધૃક્ ॥ ૭૧॥

આરોહશ્ચ નિરોહશ્ચ તીર્થઃ તીર્થંકરો હરઃ ।
ચરાચરાત્મા સૂક્ષ્મસ્તુ વિવસ્વાન્ સવિતામૃતમ્ ॥ ૭૨॥

તુષ્ટિઃ પુષ્ટિઃ કલા કાષ્ઠા માસઃ પક્ષસ્તુ વાસરઃ ।
ઋતુર્યુગાદિકાલસ્તુ લિઙ્ગમાત્માથ શાશ્વતઃ ॥ ૭૩ ॥

ચિરઞ્જીવી પ્રસન્નાત્મા નકુલઃ પ્રાણધારણઃ ।
સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ॥ ૭૪॥

મુક્તિર્લક્ષ્મીસ્તથા ભુક્તિર્વિરજા વિરજામ્બરઃ ।
વિશ્વક્ષેત્રં સદાબીજં પુણ્યશ્રવણકીર્તનઃ ॥ ૭૫॥

ભિક્ષુર્ભૈક્ષ્યં ગૃહં દારા યજમાનશ્ચ યાચકઃ ।
પક્ષી ચ પક્ષવાહશ્ચ મનોવેગો નિશાચરઃ ॥ ૭૬॥

ગજહા દૈત્યહા નાકઃ પુરુહૂતઃ પુરુષ્ટુતઃ । પુરુભૂતઃ
બાન્ધવો બન્ધુવર્ગશ્ચ પિતા માતા સખા સુતઃ ॥ ૭૭॥

ગાયત્રીવલ્લભઃ પ્રાંશુર્માન્ધાતા ભૂતભાવનઃ ।
સિદ્ધાર્થકારી સર્વાર્થશ્છન્દો વ્યાકરણ શ્રુતિઃ ॥ ૭૮॥

સ્મૃતિર્ગાથોપશાન્તશ્ચ પુરાણઃ પ્રાણચઞ્ચુરઃ । શાન્તિશ્ચ
વામનશ્ચ જગત્કાલઃ સુકૃતશ્ચ યુગાધિપઃ ॥ ૭૯॥

ઉદ્ગીથઃ પ્રણવો ભાનુઃ સ્કન્દો વૈશ્રવણસ્તથા ।
અન્તરાત્મા હૃષીકેશઃ પદ્મનાભઃ સ્તુતિપ્રિયઃ ॥ ૮૦॥સ્ક્ન્દોવૈશ્રવણસ્તથા
પરશ્વધાયુધઃ શાખી સિંહગઃ સિંહવાહનઃ ।
સિંહનાદઃ સિંહદંષ્ટ્રો નગો મન્દરધૃક્સરઃ ॥ ૮૧॥ શરઃ
સહ્યાચલનિવાસી ચ મહેન્દ્રકૃતસંશ્રયઃ ।
મનોબુદ્ધિરહઙ્કારઃ કમલાનન્દવર્ધનઃ ॥ ૮૨॥

સનાતનતમઃ સ્રગ્વી ગદી શઙ્ખી રથાઙ્ગભૃત્ ।
નિરીહો નિર્વિકલ્પશ્ચ સમર્થોઽનર્થનાશનઃ ॥ ૮૩ ॥

અકાયો ભક્તકાયશ્ચ માધવોઽથ સુરાર્ચિતઃ ।
યોદ્ધા જેતા મહાવીર્યઃ શઙ્કરઃ સન્તતઃ સ્તુતઃ ॥ ૮૪॥

વિશ્વેશ્વરો વિશ્વમૂર્તિર્વિશ્વારામોઽથ વિશ્વકૃત્ ।
આજાનુબાહુઃ સુલભઃ પરં જ્યોતિઃ સનાતનઃ ॥ ૮૫॥

વૈકુણ્ઠઃ પુણ્ડરીકાક્ષઃ સર્વભૂતાશયસ્થિતઃ ।
સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૮૬॥

ઊર્ધ્વરેતાઃ ઊર્ધ્વલિઙ્ગઃ પ્રવરો વરદો વરઃ ।
ઉન્મત્તવેશઃ પ્રચ્છન્નઃ સપ્તદ્વીપમહીપ્રદઃ ॥ ૮૭॥

દ્વિજધર્મપ્રતિષ્ઠાતા વેદાત્મા વેદકૃચ્છ્રયઃ ।
નિત્યઃ સમ્પૂર્ણકામશ્ચ સર્વજ્ઞઃ કુશલાગમઃ ॥ ૮૮॥

કૃપાપીયૂષજલધિર્ધાતા કર્તા પરાત્પરઃ ।
અચલો નિર્મલસ્તૃપ્તઃ સ્વે મહિમ્નિ પ્રતિષ્ઠિતઃ ॥ ૮૯॥

અસહાયઃ સહાયશ્ચ જગદ્ધેતુરકારણઃ ।
મોક્ષદઃ કીર્તિદશ્ચૈવ પ્રેરકઃ કીર્તિનાયકઃ ॥ ૯૦॥

અધર્મશત્રુરક્ષોભ્યો વામદેવો મહાબલઃ ।
વિશ્વવીર્યો મહાવીર્યો શ્રીનિવાસઃ સતાં ગતિઃ ॥ ૯૧॥

સ્વર્ણવર્ણો વરાઙ્ગશ્ચ સદ્યોગી ચ દ્વિજોત્તમઃ ।
નક્ષત્રમાલી સુરભિર્વિમલો વિશ્વપાવનઃ ॥ ૯૨॥

વસન્તો માધવો ગ્રીષ્મો નભસ્યો બીજવાહનઃ ।
નિદાઘસ્તપનો મેઘો નભો યોનિઃ પરાશરઃ ॥ ૯૩॥

સુખાનિલઃ સુનિષ્પન્નઃ શિશિરો નરવાહનઃ ।
શ્રીગર્ભઃ કારણં જપ્યો દુર્ગઃ સત્યપરાક્રમઃ ॥ ૯૪॥

આત્મભૂરનિરુદ્ધશ્ચ દત્તાત્રેયસ્ત્રિવિક્રમઃ ।
જમદગ્નિર્બલનિધિઃ પુલસ્ત્યઃ પુલહોઽઙ્ગિરાઃ ॥ ૯૫॥

વર્ણી વર્ણગુરુશ્ચણ્ડઃ કલ્પવૃક્ષઃ કલાધરઃ ।
મહેન્દ્રો દુર્ભરઃ સિદ્ધો યોગાચાર્યો બૃહસ્પતિઃ ॥ ૯૬॥

નિરાકારો વિશુદ્ધશ્ચ વ્યાધિહર્તા નિરામયઃ ।
અમોઘોઽનિષ્ટમથનો મુકુન્દો વિગતજ્વરઃ ॥ ૯૭॥

સ્વયંજ્યોતિર્ગુરુતમઃ સુપ્રસાદોઽચલસ્તથા ।
ચન્દ્રઃ સૂર્યઃ શનિઃ કેતુર્ભૂમિજઃ સોમનન્દનઃ ॥ ૯૮॥

ભૃગુર્મહાતપા દીર્ઘતપાઃ સિદ્ધો મહાગુરુઃ ।
મન્ત્રી મન્ત્રયિતા મન્ત્રો વાગ્મી વસુમનાઃ સ્થિરઃ ॥ ૯૯॥

અદ્રિરદ્રિશયો શમ્ભુર્માઙ્ગલ્યો મઙ્ગલોવૃતઃ ।
જયસ્તમ્ભો જગત્સ્તમ્ભો બહુરૂપો ગુણોત્તમઃ ॥ ૧૦૦॥

સર્વદેવમયોઽચિન્ત્યો દેવતાત્મા વિરૂપધૃક્ ।
ચતુર્વેદશ્ચતુર્ભાવશ્ચતુરશ્ચતુરપ્રિયઃ ॥ ૧૦૧॥

આદ્યન્તશૂન્યો વૈકુણ્ઠઃ કર્મસાક્ષી ફલપ્રદઃ ।
દૃઢાયુધઃ સ્કન્દગુરુઃ પરમેષ્ઠી પરાયણઃ ॥ ૧૦૨॥

કુબેરબન્ધુઃ શ્રીકણ્ઠો દેવેશઃ સૂર્યતાપનઃ ।
અલુબ્ધઃ સર્વશાસ્ત્રજ્ઞઃ શાસ્ત્રાર્થઃ પરમઃપુમાન્ ॥ ૧૦૩ ॥

અગ્ન્યાસ્યઃ પૃથિવીપાદો દ્યુમૂર્ધા દિક્ષુતિઃ પરઃ । દ્વિમૂર્ધા
સોમાન્તઃ કરણો બ્રહ્મમુખઃ ક્ષત્રભુજસ્તથા ॥ ૧૦૪॥

વૈશ્યોરુઃ શૂદ્રપાદસ્તુ નદીસર્વાઙ્ગસન્ધિકઃ ।
જીમૂતકેશોઽબ્ધિકુક્ષિસ્તુ વૈકુણ્ઠો વિષ્ટરશ્રવાઃ ॥ ૧૦૫॥

ક્ષેત્રજ્ઞઃ તમસઃ પારી ભૃગુવંશોદ્ભવોઽવનિઃ ।
આત્મયોની રૈણુકેયો મહાદેવો ગુરુઃ સુરઃ ॥ ૧૦૬॥

એકો નૈકોઽક્ષરઃ શ્રીશઃ શ્રીપતિર્દુઃખભેષજમ્ ।
હૃષીકેશોઽથ ભગવાન્ સર્વાત્મા વિશ્વપાવનઃ ॥ ૧૦૭॥

વિશ્વકર્માપવર્ગોઽથ લમ્બોદરશરીરધૃક્ ।
અક્રોધોઽદ્રોહ મોહશ્ચ સર્વતોઽનન્તદૃક્તથા ॥ ૧૦૮॥

કૈવલ્યદીપઃ કૈવલ્યઃ સાક્ષી ચેતાઃ વિભાવસુઃ ।
એકવીરાત્મજો ભદ્રોઽભદ્રહા કૈટભાર્દનઃ ॥ ૧૦૯॥

વિબુધોઽગ્રવરઃ શ્રેષ્ઠઃ સર્વદેવોત્તમોત્તમઃ ।
શિવધ્યાનરતો દિવ્યો નિત્યયોગી જિતેન્દ્રિયઃ ॥ ૧૧૦॥

કર્મસત્યં વ્રતઞ્ચૈવ ભક્તાનુગ્રહકૃદ્ધરિઃ ।
સર્ગસ્થિત્યન્તકૃદ્રામો વિદ્યારાશિર્ગુરૂત્તમઃ ॥ ૧૧૧॥

રેણુકાપ્રાણલિઙ્ગં ચ ભૃગુવંશ્યઃ શતક્રતુઃ ।
શ્રુતિમાનેકબન્ધુશ્ચ શાન્તભદ્રઃ સમઞ્જસઃ ॥ ૧૧૨॥

આધ્યાત્મવિદ્યાસારશ્ચ કાલભક્ષો વિશૃઙ્ખલઃ ।
રાજેન્દ્રો ભૂપતિર્યોગી નિર્માયો નિર્ગુણો ગુણી ॥ ૧૧૩ ॥

હિરણ્મયઃ પુરાણશ્ચ બલભદ્રો જગત્પ્રદઃ । var. reversed lines
વેદવેદાઙ્ગપારજ્ઞઃ સર્વકર્મા મહેશ્વરઃ ॥ ૧૧૪॥

॥ ફલશ્રુતિઃ ॥

એવં નામ્નાં સહસ્રેણ તુષ્ટાવ ભૃગુવંશજમ્ ।
શ્રીરામઃ પૂજયામાસ પ્રણિપાતપુરઃસરમ્ ॥ ૧॥

કોટિસૂર્યપ્રતીકાશો જટામુકુટભૂષિતઃ ।

વેદવેદાઙ્ગપારજ્ઞઃ સ્વધર્મનિરતઃ કવિઃ ॥ ૨॥

જ્વાલામાલાવૃતો ધન્વી તુષ્ટઃ પ્રાહ રઘૂત્તમમ્ ।
સર્વૈશ્વર્યસમાયુક્તં તુભ્યં પ્રણતિ રઘૂત્તમમ્ ॥ ૩ ॥ પ્રાદાં
સ્વતેજો નિર્ગતં તસ્માત્પ્રાવિશદ્રાઘવં તતઃ ।
યદા વિનિર્ગતં તેજઃ બ્રહ્માદ્યાઃ સકલાઃ સુરાઃ ॥ ૪॥

ચેલુશ્ચ બ્રહ્મસદનં ચ કમ્પે ચ વસુન્ધરા । ચેલુશ્વચ બ્રહ્મમદનં
દદાહ ભાર્ગવં તેજઃ પ્રાન્તે વૈ શતયોજનામ્ ॥ ૫॥

અધસ્તાદૂર્ધ્વતશ્ચૈવ હાહેતિ કૃતવાઙ્નનઃ ।
તદા પ્રાહ મહાયોગી પ્રહસન્નિવ ભાર્ગવઃ ॥ ૬॥

શ્રીભાર્ગવ ઉવાચ -
મા ભૈષ્ટ સૈનિકા રામો મત્તો ભિન્નો ન નામતઃ ।
રૂપેણાપ્રતિમેનાપિ મહદાશ્ચર્યમદ્ભુતમ્ ।
સંસ્તુત્ય પ્રણાયાદ્રામઃ કૃતાઞ્જલિપુટોઽબ્રવીત્ ॥ ૭॥

શ્રીરામ ઉવાચ -
યદ્રૂપં ભવતો લબ્ધં સર્વલોકભયઙ્કરમ્ ।
હિતં ચ જગતાં તેન દેવાનાં દુઃખનાશનમ્ ॥ ૮॥ દુઃખ શાતનમ્
જનાર્દન કરોમ્યદ્ય વિષ્ણો ભૃગુકુલોદ્ભવઃ ।
આશિષો દેહિ વિપ્રેન્દ્ર ભાર્ગવસ્તદનન્તરમ્ ॥ ૯॥

ઉવાચાશીર્વચો યોગી રાઘવાય મહાત્મને ।
પરં પ્રહર્ષમાપન્નો ભગવાન્ રામમબ્રવીત્ ॥ ૧૦॥

શ્રીભાર્ગવ ઉવાચ -
ધર્મે દૃઢત્વં યુધિ શત્રુઘાતો યશસ્તથાદ્યં પરમં બલઞ્ચ ।
યોગપ્રિયત્વં મમ સન્નિકર્ષઃ સદાસ્તુ તે રાઘવ રાઘવેશઃ ॥ ૧૧॥

તુષ્ટોઽથ રાઘવઃ પ્રાહ મયા પ્રોક્તં સ્તવં તવ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ શ્રાવયેદ્વા દ્વિજોત્તમાન્ ॥ ૧૨॥

દ્વિજેષ્વકોપં પિતૃતઃ પ્રસાદં શતં સમાનામુપભોગયુક્તમ્ ।
કુલે પ્રસૂતિં માતૃતઃ પ્રસાદં સમાં પ્રાપ્તિં પ્રાપ્નુયાચ્ચાપિ દાક્ષ્યમ્ ।
પ્રીતિં ચાગ્ર્યાં બાન્ધવાનાં નિરોગમ્ કુલં પ્રસૂતૈઃ પૌત્રવર્ગૈઃ સમેતમ્ ॥ ૧૩ ॥

અશ્વમેધ સહસ્રેણ ફલં ભવતિ તસ્ય વૈ ।
ધૃતાદ્યૈઃ સ્નાપયેદ્રામં સ્થાલ્યાં વૈ કલશે સ્થિતમ્ ॥ ૧૪॥

નામ્નાં સહસ્રેણાનેન શ્રદ્ધયા ભાર્ગવં હરિમ્ ।

સોઽપિ યજ્ઞસહસ્રસ્ય ફલં ભવતિ વાઞ્છિતમ્ ॥ ૧૫॥

પૂજ્યો ભવતિ રુદ્રસ્ય મમ ચાપિ વિશેષતઃ ।
તસ્માન્નામ્નાં સહસ્રેણ પૂજયેદ્યો જગદ્ગુરુમ્ ॥ ૧૬॥

જપન્નામ્નાં સહસ્રં ચ સ યાતિ પરમાં ગતિમ્ ।
શ્રીઃ કીર્તિર્ધીર્ધૃતિસ્તુષ્ટિઃ સન્તતિશ્ચ નિરામયા ॥ ૧૭॥

અણિમા લઘિમા પ્રાપ્તિરૈશ્વર્યાદ્યાશ્ચ ચ સિદ્ધયઃ ।
સર્વભૂતસુહૃત્ત્વં ચ લોકે વૃદ્ધીઃ પરા મતિઃ ॥ ૧૮॥

ભવેત્પ્રાતશ્ચ મધ્યાહ્ને સાયં ચ જપતો હરેઃ ।
નામાનિ ધ્યાયતો રામ સાન્નિધ્યં ચ હરેર્ભવેત્ ॥ ૧૯॥

અયને વિષુવે ચૈવ જપન્ત્વાલિખ્ય પુસ્તકમ્ ।
દદ્યાદ્વૈ યો વૈષ્ણવેભ્યો નષ્ટબન્ધો ન જાયતે ॥ ૨૦॥

ન ભવેચ્ચ કુલે તસ્ય કશ્ચિલ્લક્ષ્મીવિવર્જિતઃ ।
વરદો ભાર્ગવસ્તસ્ય લભતે ચ સતાં ગતિમ્ ॥ ૨૧॥

॥ ઇતિ શ્રીઅગ્નિપુરાણે દાશરથિરામપ્રોક્તં
શ્રીપરશુરામસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીભાર્ગવાર્પણમસ્તુ ।
॥ શ્રીરસ્તુ ॥

Proofread by DPD, NA

.. Shri Parashurama Sahasranamastotra ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com